9

उत्सवः

0124CH09

भारतीयपञ्चाङ्गानुसारं मकरसंक्रान्तिः, पोङ्गलः, बिहूः, लोहरी इत्यादीनि उत्तरायणपर्वाणि शिशिरात् ग्रीष्मकालं प्रति संक्रमणं सूचयन्ति । तदानीम् आचर्यमाणः उत्सवः सौरदिनानां पुनरागमनं, शस्यात् फलप्राप्तेः आरम्भं च सूचयति । स्वपरिवारेण सह आचरितानां विविधानां स्थानीयपर्वणां विषये छात्रैः सह चर्चां कुर्वन्तु। चित्रमिदं प्रत्येकम् उत्सवस्य मुख्यतत्त्वानि अपि च विविधान् आकारान् प्रतिमानान् च प्रकाशयति। तेषां विषये बालकैः सह चर्चा कर्तुं शक्यते।

© NCERT not to be republished

© NCERT
not to be republished

प्रतिमानान् अग्रे सारयन्तु।

क. 

ख. 

ग. 

घ. 

ङ 

च. 

छ. 

ज. 

मूर्तवस्तूनां सहायेन प्रतिमानं निर्मातुं बालकान् प्रोत्साहयन्तु।

© NCERT not to be republished

एहि करवाम

मुन्नाय रञ्जनं भृशं रोचते। सः अङ्गुष्ठस्य अङ्गुलीनां च उपयोगेन एकं प्रतिरूपं निर्मितवान् । दत्ते स्थाने अङ्गुलिचिह्नस्य उपयोगेन भवन्तः अपि एतादृशं प्रतिरूपं निर्मातुं शक्नुवन्ति।






पाटलवर्णस्य अनन्तरं कः वर्णः आगच्छेत् किमर्थं च ? परिचर्चां कुर्वन्तु।

बालकान् विभिन्नानि शाकानि सङ्गृह्य प्रौढानां साहाय्येन तानि लघुखण्डेषु छेत्तुं वदन्तु। स्वरुच्यनुसारं एतेषां कर्तित-लघुखण्डानां शाकानां साहाय्येन प्रतिमानमेकं निर्मान्तु।

© NCERT not to be republished

प्रतिमानान् अवलोकयन्तु विविधैः वर्णैः च रज्यन्तु।



प्रतिमानं सम्पूर्णं कुर्वन्तु।



© NCERT not to be republished

प्रतिमानं परिशील्य लुप्तसङ्ख्याः पूरयन्तु।





© NCERT not to be republished

कोलम् अथवा रङ्गोली-निर्माणे मूर्तिः वाणी च स्वस्य मातुः साहाय्यं कुर्वतः।
भवन्तः अपि अधोदत्तां रङ्गोलीं पूरयित्वा तेषां साहाय्यं कर्तुं शक्नुवन्ति।



परियोजना-कार्यम्

क. प्रस्तरखण्डानि, पुष्पाणि, पत्राणि, चषकान्, कंसान्, यष्टीः, वलयान्, मुद्राः, शिरोवस्त्रादीनि वस्तूनि सङ्गृह्य प्रतिमानरूपेण व्यवस्थापयन्तु। आभूषणानां पुष्पाधानीनां, कलाप्रदर्शनस्य च विभिन्नानि प्रतिमानानि निर्मान्तु।

ख. पत्राणि, भृङ्गान्, पशुचर्माणि (बिडालस्य, कुक्कुरस्य, वनगर्दभस्य, व्याघ्रस्य), जवनिकाः, *शाटिकाः, दुकूलानि*, मधुमक्षिका-छत्राणि इत्यादीनि प्रकृतौ विद्यमानानि परिशील्य एतेषु निहितान् प्रतिमानान् अन्वेषयन्तु ।

ग. परितः दृष्टानि विभिन्नानि वस्तूनि सङ्गृह्य तेषां कोलाज इति कुर्वन्तु।

घ. तालिकावादनम् , अङ्गुलीनां स्फोटनम् (छोटिका) , चरणयोः चिह्नम् इत्यादीनां विभिन्नक्रियाणाम् उपयोगेन प्रतिमानं निर्मान्तु।

अस्मान् परितः विद्यमानं जगद् इदं प्रतिमानमयम् अस्ति। मन्दिराणि, मस्जिद, चर्च, गुरुद्वारा, स्मारकभवनानि इत्येतान् परितः विद्यमानानां सुन्दर-प्रतिमानानाम् अन्वेषणं कारयित्वा, बालकान् भारतस्य समृद्धपरम्परां प्रशंसितुं प्रेरयन्तु। विविध-कलारूपेषु नृत्यरूपेषु च विद्यमानानां प्रतिमानानां विषये स्वस्य अवलोकनं संविभक्तुम् अपि छात्रान् वदन्तु ।

© NCERT not to be republished